International Journal of Sanskrit Research 2018; 4(3): 162-164

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 162-164
© 2018 IJSR
www.anantaajournal.com
Received: 19-03-2018
Accepted: 22-04-2018

**महेश भट्ट**
शोधच्छात्र: कर्णाटक संस्कृतविश्वविद्यालय: बेङ्गलूरु, कर्नाटक, भारत

Correspondence
**महेश भट्ट**
शोधच्छात्र: कर्णाटक संस्कृतविश्वविद्यालय: बेङ्गलूरु, कर्नाटक, भारत

# गौणमुख्यपरिभाषासम्बद्धतार्किकपरिष्कारा:

**महेश भट्ट**

**प्रस्तावना**

ननु "महद्भूत: चन्द्रमा:" इति किञ्चिदुदाहरणम् | तत्र आमहान् महान् सम्पद्यते इत्यर्थे कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि: (०५/०४/५०) [1] इत्यनेन महच्छब्दात् अभूततद्भावे च्विप्रत्यय: | तत: ऊर्यादिच्विडाचश्च (०१/०४/६१) [2] इत्यनेन गतिसंज्ञकस्य च्विप्रत्ययान्तस्य महच्छब्दस्य समानाधिकरणेन कर्त्रर्थकक्तप्रत्ययान्तेन भूतशब्देन सह प्रादिसमास:| अर्थवद्ग्रहणे नानर्थकस्य (प. सं. १४) [3] इति परिभाषया अनर्थकस्य वारणे अपि मुख्यस्यैव अर्थस्य ग्रहणे मानाभावात् "महद्भूत:" इत्यत्र अमहति चन्द्रमसि महत्त्वारोपेण महच्छब्दस्य गौणार्थबोधकत्वे अपि आन्महत: समानाधिकरणजातीययो: (०६/०३/४६) [4] इति इति आत्वापत्तौ सत्याम्, गौणमुख्ययो: मुख्ये कार्यसम्प्रत्यय: (प. सं. १५) [5] इति परिभाषा अवतारिता | गौणार्थमुख्यार्थबोधकशब्दयोर्मध्ये मुख्यार्थबोधकशब्दे एव कार्यं प्रवर्तते इति परिभाषार्थ: | परिभाषास्वीकारे तु महद्भूत; इत्यत्र एकदेशिन: महच्छब्दस्य गौणत्वेन, महाराज: इत्यादौ वर्तमानस्य मुख्यत्वेन च उभयत्र कार्यप्राप्तौ मुख्ये एव कार्यं भवति | तेन महद्भूत: इत्यत्र महच्छब्दस्य आत्वं नास्ति | इदमेव उक्तम् वाक्यपदीये ब्रह्मकाण्डे अपि

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुता: |
शास्त्रार्थस्तेषु कर्तव्य: शब्देषु न तदुक्तिषु || [6] इति |

मूले तु "गुणादागतो गौण: | यथा गोशब्दस्य जाड्यादिनिमित्तोर्थ: वाहीक: | अप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुध्यते | मुखमिव प्रधानत्वात् मुख्य: = प्रथम: इत्यर्थ: | गौणे ह्यर्थे शब्द: प्रयुज्यमानो मुख्यार्थारोपेण प्रवर्तते | एवं च अप्रसिद्धत्वं गौणलाक्षणिकत्वं गौणत्वम् [7] इति गौणलक्षणमुक्तम् | एवञ्च देवदत्तादिसंज्ञा:, गौर्वाहीकादय: गौणप्रयोगाश्च अस्य उदाहरणानि |

## चन्द्रिकाकारस्य मते गौणलक्षणम् |

चन्द्रिकाकारस्तु आरोपितधर्मवास्तवधर्मैतदन्यतरधर्मप्रयुक्तसादृश्यमू- लकशक्यतावच्छेदकरूपत्वं गौणत्वम् [8] इति तल्लक्षणमुवाच | इदञ्च लक्षणं गौणाऽप्रसिद्धसाधारणम् | अत्र देवदत्तादिसंज्ञासु वास्तवधर्मप्रयुक्तशक्यतावच्छेदकरूपत्वेन गौणत्वम् | तथा गौर्वाहीक: इत्यादौ आरोपितधर्मप्रयुक्तसादृश्यमूलकशक्यतावच्छेदकरूपत्वेन गौणत्वम् | एवं लक्षणमिदम् उभयत्राऽपि सङ्गच्छते |

## अनुवादचन्द्रिकाकारस्य मतेन गौणमुख्ययोर्लक्षणम् |

गौणमुख्ययोरुभयोरपि कार्यप्रसङ्गे मुख्ये एव कार्यप्रवृत्तिनिश्चय: इत्येवं परिभाषार्थं निरूप्य दीक्षितादीनां मते गौणशब्देन अनुकरणलाक्षणिकप्राकृतसङ्केतविषयाणां त्रयाणामपि ग्रहणं कर्तव्यम् इति प्रतिपाद्य, कपिञ्जलाधिकरणन्यायेन प्राथमिकबुद्धिविषयं प्रथमम् उपादाय, शास्त्रार्थे निष्पन्ने सति, तत: पश्चात् जायमानस्य बोधस्य ये विषया:, तेषां शब्दस्वरूपादीनां शास्त्रविषयत्वं न भवतीत्येतदेव प्रकृतपरिभाषामूलम् | एवञ्च अनेन प्राथमिकबुद्धिविषयत्वं मुख्यत्वम् [9] इति अवगम्यते | गौर्वाहीक: इत्यत्र गोपदश्रवणमात्रेण प्रथमं सास्नादिमदर्थस्य प्रतीतिर्भवति | अत: गोपदजन्यप्राथमिकबुद्धिविषयत्वं सास्नादिमत्यर्थे अस्तीति कृत्वा लक्षणसमन्वय: | इदमेव मुख्यलक्षणं भैवव्यां प्रधानलक्षणनाम्ना तल्लक्षणमुक्तम्| "वाच्यातिरिक्तार्थानपेक्षितप्रवृत्तिकत्वं प्रधानत्वम्" [10] इति |

गौर्वाहीक तथैव तुल्यन्यायेन पश्चाद्बुद्धिविषयत्वं गौणत्वम् [11] इति तल्लक्षणमुक्तम् | गौर्वाहीकः इत्यत्रैव प्रथमं गोपदेन सास्नादिमदर्थस्य बोधे जाते, पश्चात् गोगतजाड्यादिगुणवत्वेन वाहीकस्य बोधे जाते तस्य गोविषयकबुद्ध्यनन्तरकाले जायमानबुद्धिविषयत्वात् गौणत्वम् | सर्वमङ्गलाव्याख्यायान्तु "शीघ्रोपस्थितिविषयत्वं प्रसिद्धत्वम्" [12] इति प्रसिद्धलक्षणमभिहितम् | व्याख्यानेऽस्मिन् तुल्यवित्तिवेद्यतया "प्रसिद्धभिन्नत्वम् अप्रसिद्धत्वम् [13] इति अप्रसिद्धत्वमुक्तम् |

**गौणलक्षणे बृहच्छास्त्रार्थकलाकारस्य मतम् |**

तत्र आदौ गौणमुख्यशब्दयोः शब्दनिर्वचनम् उपपादयामास | मुखमिव मुख्यम् इति मुख्यशब्दस्य विग्रहः | तत्र शाखादिभ्यो यत् (०५/०३/१०३) [14] इत्यनेन यत्प्रत्यये कृते रूपम् | तथैव गौणः इत्यत्र गुणादागतः विग्रहे तत आगतः (०४/०३/७४) [15] इत्यनेन अण्प्रत्ययः | गुणादागतः इति विग्रहे गुणात् इत्यत्र हेतौ (०२/०३/२३) [16] इत्यनेन हेतौ पञ्चमीविभक्तिः | आगतः इत्यत्र आङ्पूर्वात् गत्यर्थकात् गम्धातोः (धा. सं. ९८२) [17] गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (०३/०४/७२) [18] इत्यनेन क्तप्रत्यये सति रूपम् | निरुक्तविग्रहे आङ्पूर्वात् गम्धातोः ज्ञानमर्थः | एवञ्च गुणहेतुकयथाकथञ्चिच्छब्दविषयः इति वाक्यार्थः | अत्र आङ्पूर्वकगम्धात्वर्थभूतज्ञानम् आरोपात्मकं स्वीकार्यम् | गुणादागतः इत्यत्र गुणपदं गुणज्ञानार्थकम् | आगतः इत्यत्र वर्तमानः क्तप्रत्ययः ज्ञानविषयताश्रयार्थकः | स्वशक्यतावच्छेदकसमानाधिकरणगुणप्रतिसन्धानप्रयोज्यस्वशक्यतावच्छेदकप्रकारकारोपीयविशेष्यताश्रयत्वं [19] गौणार्थस्य लक्षणम् | गौर्वाहीकः इत्युदाहरणम् | अत्र स्वशब्देन गोपदार्थः ग्राह्यः | अतः स्वं=गौः | स्वशक्यतावच्छेदकं गोत्वम् | तच्छक्यतावच्छेदकीभूतगोत्वसमानाधिक- रणगुणाः = गोनिष्ठजाड्यादिगुणाः | तत्प्रतिसन्धानप्रयोज्यस्वशक्यतावच्छेद-कप्रकारकारोपो नाम वाहीके अयं गौः इत्यारोपः | तस्मिन् ज्ञाने गोत्वं प्रकारतया भासते | एवञ्च गोत्वनिष्ठप्रकारतानिरूपितविशेष्यताऽश्रयत्वं वाहीके वर्तते इति कृत्वा लक्षणसमन्वयः | गोगताः जाड्यमूर्खत्वसदसद्विवेकराहित्यादिगुणाः तेषां भारवाहके वाहीके वृषभसदृशे पुरुषे ज्ञानात् गोपदशक्यतावच्छेदकं गोत्वं तत्र पुरुषे आरोप्यते इत्यतः वाहीकः पुरुषः गोपदस्य गौणार्थो भवति | परन्तु प्रकृतगुरुभूतलक्षणापेक्षया पश्चाद्बुद्धिविषयत्वं गौणत्वमिति लघुलक्षणमेव युक्तं मे भाति, यतः ग्रन्थे तत्र क्वापि अतिव्याप्त्यादयः न दर्शिताः |

**तत्त्वप्रकाशिकाकारस्य मतेन गौणलक्षणम् |**

अत्र प्रकरणे तत्त्वप्रकाशिकायां लक्षणशरीरं भिन्नतया प्रोवाच | "स्वशक्यार्थनिष्ठगुणसजातीयगुणसत्ताप्रयोज्यारोपविषयीभुतत्वं गौणत्वम्" [20] | अस्योदाहरणे "गौर्वाहीकः" इत्यत्र स्वशब्देन गोशब्दो ग्राह्यः | स्वशक्यार्थो नाम = गोपदशक्यः सास्नादिमानर्थः | तन्निष्ठगुणाः जाड्यादयः | तज्जाड्यादिगुणसजातीयगुणसत्ताप्रयोज्यारोपविषयत्वं वाहीके अस्तीति कृत्वा तत्र लक्षणसमन्वयः | अत्र बलीवर्दादिरूपर्थस्य वाहीके अन्वयतात्पर्यानुपपत्तौ गोत्वस्य साधारणधर्माश्रयत्वेन वाहीके आरोपो भवति | एवञ्च आरोपितगोत्ववान् वाहीकः इति बोधो भवति |

**गौणलाक्षणिकत्वपरिष्कारः |**

मूले "एवञ्च अप्रसिद्धत्वं गौणलाक्षणिकत्वं च अत्र गौणत्वम् [21] इत्युक्तम् | तत्र गौणलाक्षणिकत्वं नाम किमिति चेत्, बृहच्छास्त्रार्थकलायाम्- गुणप्रयोज्यलक्षणाविषयत्वं गौणलाक्षणिकत्वम् [22] इत्युक्तम् | अत्र "सिंहो माणवकः" इत्युदाहरणम् | सिंहगताः ये शौर्यगाम्भीर्यादिगुणाः, तत्प्रयोज्यलक्षणाविषयत्वं माणवके वर्तते इत्यतः लक्षणसमन्वयः | एवञ्चाऽत्र सिंहपदं लक्षणया माणवकं बोधयतीति तात्पर्यम् |

अत्र सर्वमङ्गलाकारोऽपि "शक्तिजन्यपदोपस्थितिविषयत्वं मुख्यत्वम्" [23] इति मुख्यलक्षणमुक्त्वा "प्रवृत्तिनिमित्तारोपविषयत्वं गौणत्वम्" [24] इत्येव गौणलक्षणमुपस्थापयामास | गौर्वाहीकः, गौरनुबध्यः इत्यादिप्रयोगेषु गोपदस्य समवायसम्बन्धेन गोत्ववत्येव प्रचुरप्रयोगेण तस्यैव प्रसिद्धत्वेन झडिति प्रतीत्या प्राथम्येन शक्यत्वं गोपदजन्यप्रतीतौ विशेष्यभूतव्यक्तेः आरोपविषयगोत्वाश्रये गौणत्वं सम्भवति | अत एव भर्तृहरिणा वाक्यपदीये

> गोत्वानुषङ्गो वाहीके निमित्तात् कैश्चिदिष्यते |
> अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः || [25] इति प्रतिपादयामास |

अत्र जाड्यादिनिमित्तात् अनुषङ्ग= आरोपः कैश्चित् शब्दार्थसम्बन्धनित्यत्ववादिभिःविशेष्यभूतव्यक्तिरूपम् अर्थमात्रम्, गोशब्दः स्वार्थप्रवृत्तिनिमित्तभूतगोत्वे एव वर्तते इत्यर्थः | एवं हरिवचनस्य वर्तमानत्वादेव रज्जौ सर्पभ्रमे अपि रज्जुं सर्पत्वेन अध्यवसाय प्रयुज्यमानः सर्पशब्दः स्वार्थं न जहाति | अर्थविपर्यासस्तु भवतीति कैयटः जगाद |

एतावदुक्त्वा पुनः अप्रसिद्धलक्षणमुक्तम् ग्रन्थकृता | "प्रसिद्धगतगुणक्रियादेः असतोऽप्यारोपपूर्वकप्रवृत्तिनिमित्तत्वारोपेण तत्पदजन्यप्रतीतिविषयत्वम् अप्रसिद्धत्वम्" [26] इति | गां पाठय, गौरनिबध्यः, गौर्वाहीकः इत्यादौ गोपदवाच्यप्रसिद्धभूतसास्नादिमदर्थग- ताऽविचार्यकरणादिक्रियाः, जाड्यादिगुणाः, एतेषाम् असतामपि वाहीकादौ आरोपपूर्वकप्रवृत्तिनिमित्तात्वारोपेण गोपदजन्यप्रतीतिविषयत्वं वाहीकादौ वर्तते इति कृत्वा तत्र लक्षणसमन्वयः |

**गौणलाक्षणिकलक्षणे भूतिकारस्य मतम् |**

अत्र गौणलाक्षणिकलक्षणे लक्षणभेदमुवाच | तदेव सः सदृशलाक्षणिकमिति नामान्तरेणाऽपि निर्दिदेश | सादृश्यमूलकारोपविषयत्वं गौणलाक्षणिकत्वम् [27] | गौर्वाहीकः इत्यत्र गोगताजाड्यादिगुणवत्त्वात् तत्सादृश्यमूलकारोपविषयत्वं वाहीके वर्तते इति कृत्वा लक्षणसमन्वयः | एवंरूपस्य गौणलाक्षणिकत्वस्य स्वीकारादेव "अमहाब्राह्मणः" इत्यत्र महाब्राह्मणत्वाभाववति महाब्राह्मणत्वारोपः अत्र नञा द्योत्यते | तेन "अमहाब्राह्मणः" इत्यस्य आरोपितमहाब्राह्मणत्ववान् इत्यर्थः | अत्राऽपि "महद्भूतः" इत्यत्र इव आरोपितमहत्त्वस्य भाने अपि निरुक्तसदृशलाक्षणिकत्वानुसारेण आरोपे सादृश्यमूलकत्वाभात् गौणत्वाभावेन, गौणमुख्यपरिभाषायाः अप्रवृत्तेः "अमहाब्राह्मणः" इत्यत्र आन्महतः समानाधिकरणजातीययोः (०६/०३/४६) [28] इत्यनेन आत्वं भवत्येव |

अत्र विषये हैमवत्यां तु प्रकारान्तरेण गौणार्थलक्षणमेवमुक्तम्- "स्वशक्यार्थनिष्ठगुणसजातीयगुणहेतुकारोपविषयधर्मनिमित्तकप्रवृत्त्याश्रयत्वं गौणत्वम्" [29] इति | गौर्वाहीकः, गौरनुबध्यः इत्यादौ स्वं=गौः | स्वशक्यः सास्नादिमानर्थः | तन्निषठगुणाः नाम जाड्यादयः | तत्सजातीयगुणहेतुकारोपविषयधर्मः गोत्वम् | तन्निमित्तकप्रवृत्त्याश्रयः वाहीकः इति कृत्वा लक्षणसमन्वयः | एवञ्च गोनिष्ठजाड्यादिगुणसजातीयगुणहेतुकारोपविषयधर्मगोत्वादिनिमित्तको वाहीकरूपोऽर्थः इत्यर्थः | तथैव किं नाम प्रधानत्वमिति चेत् "प्रधानत्वञ्च वाच्यातिरिक्तार्थानपेक्षप्रतिपत्तीजनकत्वम्" [30] इत्युक्तम् | अस्य लक्षणस्य प्राथमिकशक्तिजन्यबोधे तात्पर्यम् | एवमनेके अनेकधा गौणमख्ययोः लक्षणं प्रोचुः ।

**ग्रन्थसूची**


1. पाणिनीया अष्टाध्यायी पृ. सं. ९८
2. पाणिनीया अष्टाध्यायी पृ. सं. १४
3. परिभाषेन्दुशेखरः पृ. सं. ६६

4. पाणिनीया अष्टाध्यायी पृ. सं. १०२
5. परिभाषेन्दुशेखरः. पृ. सं. ७०
6. वाक्यपदीयम् पृ. सं. २६
7. परिभाषेन्दुशेखरः पृ. सं. ५२
8. परिभाषेन्दुशेखरः पृ. सं. १०४
9. परिभाषेन्दुशेखरः पृ. सं. ६०
10. परिभाषेन्दुशेखरः पृ. सं. ५२
11. परिभाषेन्दुशेखरः पृ. सं. ६०
12. परिभाषेन्दुशेखरः पृ. सं. ८६
13. परिभाषेन्दुशेखरः पृ. सं. ८६
14. परिभाषेन्दुशेखरः पृ. सं. ८२
15. परिभाषेन्दुशेखरः पृ. सं. ८२
16. परिभाषेन्दुशेखरः पृ. सं. २३
17. वैयाकरणसिद्धान्तकौमुदी पृ. सं. ३८७
18. पाणिनीया अष्टाध्यायी पृ. सं. ४९
19. परिभाषेन्दुशेखरः. पृ. सं. १३३
20. परिभाषेन्दुशेखरः पृ. सं. ५१
21. परिभाषेन्दुशेखरः पृ. सं. ७०
22. परिभाषेन्दुशेखरः. पृ. सं. १३४
23. परिभाषेन्दुशेखरः पृ. सं. ८७
24. परिभाषेन्दुशेखरः पृ. सं. ८७
25. वाक्यपदीयम् २५५
26. परिभाषेन्दुशेखरः पृ. सं. ८७
27. परिभाषेन्दुशेखरः पृ. सं. ९०
28. पाणिनीया अष्टाध्यायी पृ. सं. १०२
29. परिभाषेन्दुशेखरः पृ. सं. ६६
30. परिभाषेन्दुशेखरः पृ. सं. ६७